Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

राष्ट्रियशिक्षानीतौ संस्कृतभाषायाः क्रियान्वितिः

The Implementation of Sanskrit in National Education Policy

डा. वेङ्कट श्रीनिवासराव्. यन्

संस्कृताध्यापकः, तिरुपतिः

भारतस्य शैक्षिकेतिहासे कश्चन ऐतिहासः घट्टः एषः। शताधिकवर्षाणाम् अनन्तरं भारतस्य शिक्षाक्षेत्रे किञ्चित् क्रान्तिकारकं पदं भारतसर्वकारेण निक्षिप्तम्। भारतीयतत्त्वानाम् आधारेण भारतीयजीवनादर्शानाम् आधारेण नूतनशिक्षापद्धतिः भवेत्। या शिक्षापद्धतिः या शिक्षाव्यवस्था भारते मूलं सत् आकाशस्पर्शिनी स्यात् इति मान्य प्रधानमन्त्रिणः वचनं वयं श्रुतवन्तः तथा तादृशी काचित् भारतीयचित्तस्य समुद्धापनस्य काचित् शिक्षानीतिः इदानीम् आनीता। अतः वयं एतस्याः शिक्षानीतेः पूर्णहृदयेन स्वागतं कुर्मः। किञ्च अद्यपर्यन्तं यावत्यः राष्ट्रियशिक्षानीत्यः आगतः तासु सर्वासु अपि नीतिषु संस्कृतविषये अत्यधिकमात्रेण वर्णनम् अत्यन्त उत्तमरूपेण संस्कृतस्य चित्रणम् एवं संस्कृतशिक्षणे यानि परिवर्तनानि अपेक्षितानि तादृशानां तेषां परिवर्तनानाम् उल्लेखः प्रथमवारम् एतादृशरूपेण शिक्षानीतौ प्रकाशितम्। अतः अपि वयं एतस्याः स्वागतं कुर्मः। तथा तु चिन्तनीयः विषयाः बहवः सन्ति।

अद्य वयं माध्यमिक-उच्च-माध्यमिकविषये अधिकं चिन्तयामः। संस्कृतशिक्षणस्य चत्वारि अथवा पञ्चस्थानानि सन्ति। एकं स्थानं प्रथमकक्ष्यातः द्वादशकक्ष्यापर्यन्तम्। अपरं स्थानं विद्यालयीयस्थरस्य एवं पारम्परिकपाठशालाः यत्र यत्र मध्यम उपाध्यय इत्यादि नाम्ना कक्ष्याः भवन्ति। तृतीयं स्थानं B.A., M.A. इत्यादि आधुनिकदारासु संस्कृतकक्ष्याः। चतुर्थं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

स्थानं पारम्परिकपद्धत्या पारम्परिककलाशालाः इव कथ्यमानाः शास्त्री, आचार्यादिकक्ष्याः। पञ्चमं स्थानं तावत् एतादृशम् औपचारिकशिक्षा व्यवस्थातः बहिः अनौपचारिकरूपेण समाजे पाठाः दूरस्थशिक्षाः गुरुकुलानि गुरवः पुनः वैय्यक्तिकरूपेण यत् पाठयन्ति इत्यादीनि तानि पञ्चमस्थानम्। तर्हि एतेषां पञ्चानामपि यद्यपि परस्परं सम्बन्धः अस्ति। अन्योन्याश्रयः अस्ति, समग्रतया अस्माकं चिन्तनं करणीयं तथापि अद्य प्रकृत सत्रे वयं कञ्चित् सीमितं विषयं स्वीकृत्य चर्चां कुर्मः। बहुधा उच्चशिक्षायां विद्यमानानां पाठशालाशिक्षाविषये कल्पना न भवति। पुनश्च पाठशालाविक्षायां विद्यमानानामपि विविधप्रान्तेषु विविध Boards मध्ये पाठनं कथं प्रचलति, पाठ्यपुस्तकानि कथं सन्ति इत्यादि कल्पनाः भवन्ति। देशे सर्वत्र आहत्य परिस्थितिः भिन्ना भिन्ना अस्ति। अतः अस्माभिः चिन्तनीयाः विषयाः बहवः सन्ति। अद्य किञ्चित् नूतनशिक्षानीतिसन्दर्भे वयं सीमितं चिन्तनं कुर्मः।

पुनश्च विशेषतया मया इदानीं कथ्यमानविषयेषु आरम्भे नूचनशिक्षानीतौ संस्कृतविषये किं किमस्ति इति संक्षेपेण वदामि। अग्रिमसोपानानि कानि इत्यपि वदामि। तदनन्तरं संस्कृतज्ञानम् अस्माकं सज्जता का भवेत् इति एवं तस्मिन् अंशे अपि निवेदयामि। प्रथमं तावत् एतस्यां शिक्षानीतौ प्रकृतम् अहं संस्कृतसम्बन्धे केवलं वदामि अन्यविषयाणां तु तत्र बहवः उत्तमाः अंशाः सन्ति। यासां संस्कृतोपरि प्रभावः भवति, संस्कृतः अपि लाभः भवति, तर्हि विद्यालयीयशिक्षायां तत्र भाषाणां विषये न केवलं संस्कृतं सर्वभारतीयभाषाणां विषये आग्रहः दर्शितः। विद्यालयीयशिक्षायाम् उच्चशिक्षायां च आरभ्यतः अन्तपर्यन्तं शिक्षानीतिः भारतीयभाषाणां कृते अनुकूला अस्ति इति प्रथमः बिन्दुः। द्वितीयबिन्दुः त्रिभाषासूत्रं पूर्वापेक्षया इतोऽपि समीचीनस्तरूपेण स्थापिता। त्रिभाषासूत्रं तु स्थापितं, परन्तु तत्र विकल्पः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

दत्तः (FLEXBULETY) इति समञ्जनं दत्तः। पुनश्च पूर्वं त्रिभाषासूत्रस्य अन्वयः षष्टकक्ष्यातः दशमकक्ष्यापर्यन्तं कृतमासीत्।

परन्तु इदानीम् अत्र द्विधा अपि दृश्यते। त्रिभाषासूत्रानुगुणं पाठ्यपुस्तकानां लेखनसन्दर्भे आधारभूतस्तरः माध्यमिकस्तरः इति स्तरद्वयस्य उल्लेखः कृतः संस्कृतपाठ्यपुस्तकलेखनसन्दर्भे अर्थात् तृतीयकक्ष्यातः अष्टमकक्ष्यापर्यन्तमिति पाठ्यपुस्तकसन्दर्भे तत्र उक्तमस्ति। परन्तु अन्येषु स्थानेषु संस्कृतभाषा प्राथमिकस्तरतः उच्चस्तरपर्यन्तं सर्वेषु स्तरेषु पाठ्येत इति उक्तमस्ति। पाठनस्य विकल्पाः भवेयुरित्यपि उक्तमस्ति। भवन्तः शिक्षकाः जानन्ति एव शैक्षिकपरिवर्तने पञ्चसोपानानि भवन्ति। प्रथमसोपानं शिक्षानीतिः। द्वितीयसोपानं राष्ट्रियपाठ्यचर्चा इति। तृतीयसोपानं राज्येषु पाठ्यचर्या निर्माणं भवति। चतुर्थसोपाने पाठ्यपुस्तकलेखनं भवति। पञ्चमसोपाने शिक्षकाणां प्रशिक्षणं भवति। तदनन्तरं व्यापकरूपेण तेषां क्रियान्वयनं भवति। तर्हि इदानीम् एकसोपानानन्तरं द्वितीयसोपानामेव इति नास्ति। क्वचित् शिक्षकप्रशिक्षणं आरम्भे एव अपि आरम्भं कर्तुं शक्नुवन्ति। एवम् आहत्य पञ्चसु मुखेषु कार्यं भवन्ति। तर्हि संस्कृतशिक्षकाणाम् अस्माकम् एतेषु पञ्चसु मुखेषु अपि अवगमनं, सक्रियता, सहभागः अपेक्षितः भवति। शिक्षानीतौ अत्र यदा त्रिभाषायाः वर्णनं कृतं काः तिस्रः भाषाः इति निर्णयः राज्यादीनः।

अतः कस्याः कक्ष्यायाः आरभ्य किं कक्ष्या पर्यन्तम् इति निर्णयः अपि त्रिभाषासूत्रस्य अन्वयः, कासु कक्ष्यासु इति विषयः अपि राज्यादीनः। पुनश्च पाठ्यचर्या इत्यादि निर्णयसमये (पत्रत्रयं भवति चेत्) भाषा त्रयमस्ति चेत् प्रथमा भाषारूपेण का द्वितीया भाषारूपेण का तृतीया भाषारूपेम का, प्रतिभाषाः अङ्काः कति, तिसृणामपि भाषाणां शतं शतं शतमिति

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

समानाः अङ्काः भवन्ति वा पुनः सप्ताहे अवधयः यदा इदानीम् आंग्लभाषायाः, मातृभाषायाः पञ्च अवधयः सन्ति। तृतीयभाषायाः संस्कृतभाषायाः त्रयः अवधयः भवन्ति। अङ्काः समानाः पाठाः समानाः तिसृणामपि भाषाणां पाठ्यपुस्तकेषु पाठाः समानाः, पुस्तकगात्रं समानं भवति। भाषास्तरः समानः। परन्तु अवधिषु भेदः भवन्ति। हिन्दी अथवा मातृभाषा, आंग्लभाषा द्वयोः अधिक अवधयः संस्कृतस्य तृतीयभाषायाः न्यूनाः अवधयः एवं सर्वं भवति। समान अनुपातेन नास्ति। तर्हि अवधीनामनुपातः कथम् इत्यादयः बहवः विषयाः सन्ति। तादृशानाम् अनुपातः कथम् इत्यादयः बहवः सन्ति, ते विषयाः राज्यैः निर्णेतव्याः भवन्ति। तर्हि एतत् सम्बन्धे शिक्षकाणाम् अस्माकं चिन्तनमावश्यकं सक्रियता अपि आवश्यकी। विस्तरेण स्वप्रान्ते एतत् विषयेऽपि चर्चा भवेत्। एवं त्रिभाषासूत्रम् अत्र सर्वस्तरेषु भवेत् इति नीतौ उक्तमस्ति। यथा राज्ये तस्य अन्वयः भवेत् तथा अस्माकं प्रयत्नः आवश्यकः। अपरः अंशः अत्र उक्तः यत् भाषाशिक्षणम् आकर्षकं भवेत् इति कश्चन अंशः उक्तः।

शिक्षानीतौ अधिकतया चतुर्थाध्यायस्य सप्तदशे अनुच्छेदे संस्कृतस्यविषये अधिकं वर्णनं कृतम्। चतुर्थाध्यायस्य सप्तदश अध्याये बहवः अंशाः उक्ताः, तत्र उक्ते एकः अंशः अस्माभिः अवलोकनीयः यत् तत्र "संस्कृत् नालर्ज्ड् सिष्टम्स्" इति शब्दप्रयोगः कृतः। शैक्षिकक्षेत्रे प्रथमवारम् अस्य शब्दस्य प्रयोगः अभवत्। "इण्डियन् नालर्ज्ड् सिष्टम्स्" इति शब्दप्रयोगः अस्ति। इत्यत्र सर्वासु भारतीयभाषासु यथा ज्ञानपरम्परा अस्ति ताः सर्वाः परिगण्याः। "संस्कृतनार्ज्ड् सिष्टम्स्" इति कथनेन संस्कृतवाङ्मये ज्ञानपरम्परायाः उच्छिष्टोल्लेखः भवति। अत्र भारतीयज्ञानपरम्परायां गणित, इतिहासः, फिलासफि इत्यादि बहूनां विषयाणाम् उल्लेखः कृतः। एकं तु चतुर्थाध्याये सप्तदश अनुच्छेदे अस्ति, पुनः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

द्वाविंशति अध्याये पञ्चदश अनुच्छेदे अपि संस्कृतविषये उक्तमस्ति। तर्हि संस्कृतभाषायाः पाठनसमये "संस्कृतनालर्ङ् सिष्टम्स्" अपि योजयित्वा पाठयति चेत् आकर्षकं भवति, उपयोगी भवति, प्रासङ्गिकं भवति। "संस्कृतनालर्ङ् सिष्टम्स्" इति पाठनं करणीयम् इति अत्र एकः विषयः उक्तः अस्ति। अन्यत् च एतत् उक्तमस्ति यत् संस्कृतपाठ्यपुस्तकलेखनसमये विषयद्वये अवधानं भवेत् इति। एकः विषयः सरलमानकसंस्कृतं तत्र लेखितुमस्तु। सरलमानकसंस्कृतम् इति एतस्य विषये किञ्चित् वक्तुमिच्छामि। केन्द्रसर्वकारे राष्ट्रियसंस्कृतपरिषद् इति काचित् परिषदस्ति। पूर्वं तस्य नाम "सेण्ट्रल् संस्कृत् बोर्ड्" आसीत्। इदानीं राष्ट्रियसंस्कृतपरिषद् इति नाम, तत्र सर्वेषां संस्कृतविश्वविद्यालयानां कुलपतयः सदस्याः भवन्ति। संस्कृत एकाडमीस् सञ्चालकाः सदस्याः भवन्ति। यू.जी.सी., यन्.सी.यार्टी., यन्.सी.टी.यी. सि.बि.यस्.सि. इत्यादीनां चेर्मेन्स् अपि सदस्याः भवन्ति। एवं पुनः नामिनेटेड् संस्कृतपण्डितारः भवन्ति। तथा परिषदा कृतः निर्णयः यत् शिक्षणस्य माध्यमभाषारूपेण सम्पर्कव्यवहारादीनां माध्यमरूपेण सरलमानकसंस्कृतप्रयोगः करणीयः इति तैः स्वीकृतः निर्णयः एतत्। राष्ट्रियसंस्कृतपरिषदः निर्णयः सरला भाषा भवेत् पाण्डित्यपूर्णभाषा न साहित्यिकभाषा न प्रौढभाषा न सरलभाषा इति प्रथम अंशः। मानक इति शब्दस्य पाणिनीय शुद्धभाषा इति। अखिलभारतीयस्तर मानकभाषा इति पाठ्यपुस्तकस्य आधारभाषा भवेत् इति एकस्य निर्देशः अस्ति। एतस्य महती आवश्यकता अस्ति। राष्ट्रियसंस्कृतपरिषदा एका समीचिनरचना आसीत्। भारतस्य श्रेष्ठविद्वांसः वैय्याकरणाः समितिसदस्याः एकं रिपोर्ट् सज्जीकृतं तत् भारतसर्वकारेणाङ्गीकृतम् यम्.हेच्.आर्.डि. वेब्सैट् मध्ये उपलब्दम्। तत्सर्वैः स्वीकृत्य पठेम। शिक्षकैः तत् सरलमानकसंस्कृतं पठनीयमस्ति इति एकं शिक्षानीतेः वैशिष्ट्यमस्ति।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

अपरं वैशिष्ट्यमस्ति संस्कृतस्य संस्कृतमाध्यमेन पाठनीयम् इति। अर्थात् "टीचिङ्ग् टू टार्गेट् लांग्वेज्"। यतः सर्वभाषाः तत् तत् भाषामाध्यमेन पाठ्यते संस्कृतमपि तन्माध्यमेन पाठनीयम्। भारतीयपद्धत्या पाठनीयम्। शतप्रतिशतं संस्कृतं संस्कृतमाध्यमेन पाठनीयम्। क्रमशः संस्कृतमाध्यमम् आनेतव्यम्। एककाले एव तत् न भवति। एतां वास्तविकतामपि अवगत्य वयं संस्कृतस्य संस्कृतमाध्यमेन पाठनाय किमर्थम् इत्युक्ते संस्कृतं भाषा अस्ति पश्यतु विषयबोधनं, भाषाभ्यासः इति शब्दप्रयोगद्वयमस्ति। गणितस्य बोधनं भवति। व्याकरणस्य बोधनं भवति। शास्त्रस्य बोधनं भवति। भाषायाः अभ्यासः भवति न तु बोधनम्। बोधने अभ्यासे भेदः अस्ति। एतादृश भाषाशिक्षणपद्धतिविषये बहवः अंशाः चिन्तनीयः अस्ति। कथं पाठनीयम् इति एषः विषयः मुख्यः, संस्कृतस्य भविष्यनिर्माणं कथं पाठनीयमिति। तत्र अस्माकं बलमावश्यकम्। शिक्षानीतौ अपि एतद् विषये बहु अग्ररूपेण उक्तमस्ति। कथं पाठनीयमिति विषयः, तर्हि एतादृशाः बहवः अंशाः सन्ति, तत्र शिक्षकनियुक्तिविषयः अपि शिक्षानीतौ चर्चितः।

प्रायशः इदानीं पर्यन्तं षष्टकक्ष्यातः दशमकक्ष्यापर्यन्तं संस्कृतमस्ति पाठशालासु। परन्तु राज्ये वा देशे वा भवतु शिक्षकः न दत्तः। अन्यभाषाशिक्षकाः संस्कृतं पाठयन्ति। समस्या भवत्येव, तेषां संस्कृतज्ञानं नास्ति। तदर्थं किं करणीयम्। शिक्षानीति अधिकारिणः तत्र उक्तमस्ति, भारतीयभाषाणां शिक्षकाणां नियुक्तिविषये विशेषव्ययः करणीयः इति शिक्षानीतिमध्ये प्रतिपादितः। परन्तु विषयाधीनः राज्ये अस्ति। तदर्थमपि अस्माकं प्रयत्नः आवश्यकः। तेलुगुशिक्षकः, आंग्लशिक्षकः भिन्नभिन्नभाषाः पाठयितुं शक्नुवन्ति। सामान्याध्यापकः अन्यान् विषयान् पाठयितुं शक्नुवन्ति संस्कृतं पाठयितुं न शक्नुवन्ति। तर्हि किं कर्तुं शक्यते। संस्कृताध्यापकानां निजनियुक्तिः करणीया। अतः अत्यधिकछात्राः संस्कृतं

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

पठन्ति। नोचेत् अनन्तरकाले संस्कृतकलाशालासु संस्कृतविश्वविद्यालयेषु छात्राः न भवन्ति, तदर्थं पाठशालासु संस्कृताध्यापकानां नियुक्तिः अनिवार्या।

इदानीं कथं पाठनीयम् इति विषये आग्रहः करणीयः। तत्र कारणमस्ति एतस्यामेव शिक्षानीतौ एकं FLEXBULETY अपि दत्तमस्ति यत् षष्ठे अथवा सप्तमे छात्रः भाषापरिवर्तनं कर्तुं शक्नोति। उदाहरणार्थं कश्चन तृतीयकक्ष्यातः संस्कृतं स्वीकृतवान् तृतीय-चतुर्थ-पञ्चमकक्ष्यासु अथवा षष्ठकक्ष्यायां संस्कृतपाठनम् आकर्षकम् इति यदि न चिन्तयति तर्हि षष्ठे अथवा सप्तमे एतद् नीत्यनुगुणं सः संस्कृतं त्यक्त्वा हिन्दी अथवा अन्यां कामपि भाषां स्वीकर्तुं शक्नोति। अथवा हिन्दी-आंग्लभाषा किमपि पठन्नस्ति तत् कष्टाय भवति तत् रोचकं न भवति तत् परित्यज्य संस्कृतं प्रति आगन्तुं शक्नोति। अत्र संस्कृतशिक्षकस्य कौशलम् अपेक्षितम्। यदि संस्कृतशिक्षकः स्व पाठनम् आकर्षकं करोति तर्हि अन्यभाषातः संस्कृतपठनाय छात्राः आगच्छेयुः। यदि संस्कृतशिक्षकस्य पाठनम् आकर्षकं न भवति तर्हि छात्राः संस्कृतपाठान् परित्यज्य अन्यभाषां प्रति गच्छेत्। एवम् एतत् षष्ठकक्ष्यायां सप्तमकक्ष्यायां च यत् भाषा परिवर्तनस्य विकल्पः यः दत्तः एषः विकल्पः संस्कृतछात्राणां संस्कृतभाषादृष्ट्या वरदानमपि भवितुमर्हति अथवा अभिशापः अपि भवितुमर्हति। अस्माभिः जागरूकैः भवितव्यम्। केवलं पाठनपद्धतिः न पाठ्यपुस्तकानि अपि यदि आकर्षकं नास्ति कठिनमस्ति प्रौढविषयाः सन्ति सन्धिसमासाः सर्वविषयान् आनयति वेदम् आनयति साहित्यम् आनयति तदानयति एतदानयति सर्वमपि पाठनीयं प्राथमिककक्ष्यायामेव इति यदि चिन्तयति तर्हि छात्राः संस्कृतं परित्यज्य गच्छन्ति।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

इदानीं बहुषु राज्येषु पाठ्यपुस्तकानि परिवर्तितानि छात्रसंख्या अधिको अभवत्। अथवा छात्रसंख्या न्यूना अभवत्। केषुचित् राज्येषु यत्र पाठ्यपुस्तकानि कठिनानि आसन् तत्र छात्रसंख्या न्यूना अभवत्। एवं राज्येषु भिन्न भिन्नसमस्याः उत्पन्नाः। अस्माभिः एतत् विषये अध्ययनं करणीयम्। पाठनपद्धतिः यदा कारणं भवति पाठ्यपुस्तकानि तथैव कारणं भवति। शिक्षकप्रशिक्षणमपि एवमेव कारणं भवति। शिक्षकप्रशिक्षणं विना पद्धतिः परिवर्तनं करोति पाठ्यपुस्तकपरिवर्तनं करोति तदा अपि समस्या भवति। अनन्तरं तद् पाठ्यपुस्तकं प्रतिस्वीकरणमभवत्। एवमपि न भवितव्यम्। अतः शिक्षकप्रशिक्षणमपि मुख्यमस्ति।

पुनश्च एतस्यां शिक्षानीतौ यतः एकम् अपरम् अंशमपि वक्तुमिच्छामि। संस्कृतज्ञानां, संस्कृतपण्डितानां, विदुषां चिन्तनस्य वर्तमानभारतस्य आकाङ्क्षाणां मध्ये भेदः अस्ति। वयं कथं चिन्तयामः शास्त्रसंरक्षणं करणीयं, वेदसंरक्षणं करणीयम् इत्यादि अस्माकम् अग्रिमपरम्परायाः कृते तत् संक्रामणीयं दातव्यम् इति तत् सत्यमपि अस्ति। परन्तु वर्तमानभारतं किं चिन्तयति समर्थभारतनिर्माणाय समृद्धभारतनिर्माणाय च अपेक्षितजनबलनिर्माणलक्ष्यमस्ति। इदानीन्तन शिक्षाव्यवस्थया समर्थभारतनिर्माणाय, समृद्धभारतनिर्माणाय अपेक्षित विविध क्षेत्रेषु कार्यं कर्तुं योग्यानां जनानां निर्माणं करणीयम् इति तर्हि संस्कृतशिक्षणमपि तत्र पूरकं भवेत्। तादृश जनानां निर्माणं कथम् इति समग्रतया संस्कृतशिक्षणचिन्तनं करोति चेत् आत्मनिर्भरभारतनिर्माणाय जगद्गुरुभारतनिर्माणाय अपेक्षित जनानां निर्माणं यदा भवेत् तदा अस्माकं शिक्षणं भवेत् इति तथा समाजस्य धावनं तस्यां दिशि अस्ति। उदाहरणार्थम् इदानीं भारतं डिजिटल् भारतं भविष्यति। टेक्नालजिभारतं भविष्यति अग्रिमदिनेषु। टेक्नालजि इति महान् उपयोगः शिक्षणे भविष्यति। तर्हि संस्कृतशिक्षकाः "टेक्नालजि एडाप् टेषन्" यदि न कुर्वन्ति। टेक्नालजि आत्मसात् न कुर्वन्ति

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:1(5), January: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd January 2023
Publication Date:10th February 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/01.01.105
www.ijmer.in

वयं पृष्टतः भविष्यामः तावदेव। वयं पृथक् भूताः भविष्यामः। एतदपि अस्माभिः चिन्तनीयम्। अस्माकं संस्कृतच्छात्राः डिजिटल् भारते योग्यः यदा भवेत् डिजिटल् भारते सहभागी यदा भवेत् तदा अस्माभिः इदानीमारभ्य संस्कृतशिक्षणस्य अपि योजनं करणीयम्। प्रयोगानाम् आरम्भः करणीयः। शिक्षणे अन्तर्जालीय उपयोगः कथं करणीयः इति चिन्तनीयः।

एवं बहुषु विषयेषु अस्माकं संस्कृतशिक्षणविषये चिन्तनं करणीयमस्ति। इदानीं परिवर्तनस्तु आरम्भः करणीयः एव। एतद् नूतनशिक्षानीतिः एतदर्थमेव अस्ति। प्रत्येकं छात्रः शिक्षकः वक्तव्यः विद्यालये छात्रान् किञ्चित् किञ्चित् संस्कृतेन भाषितुम् अभ्यासं कारयितुम्। अस्माकं छात्राः संस्कृतभाषायां धाराप्रवाहरूपेण वदन्ति चेत् अस्माकं छात्राः संस्कृतभाषायां सहजतया वक्तुं शक्नुवन्ति चेत्, सरलतया वक्तुं भवन्ति चेत्, शुद्धतया वक्तुं समर्थाः भवन्ति तादृश वातावरणं निर्माणं कुर्मः। तेन संस्कृतस्य महान् विकासः भवेत्।

जयतु संस्कृतं जयतु भारतम्